दिनाङ्क :- 15.04.2026
प्रात: - 06:55

# संस्कृत वार्ता:

**अथ वार्ता:**

**पीएम-यूएसः**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड् ट्रम्पेण सह दौरभाषिक- सम्पर्को विहितः। एकस्मिन् सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत् उभौ नेतारौ पश्चिम-एशिया-क्षेत्रस्य स्थितिं चर्चयन्तौ, होर्मुज़्-जलसंधिं मुक्तं सुरक्षितं च स्थापयितुं महत्त्वं प्रतिपादितवन्ताविति। श्रीमोदी अवदत् यत्, उभयपक्षौ सर्वेषु क्षेत्रेषु स्वस्य समग्र-वैश्विक-सामरिक-सहभागित्वस्य सुदृढीकरणाय प्रतिबद्धौ स्तः इति।

**प्रधानमन्त्री-कर्नाटका भ्रमणम्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य कर्णाटकस्य एकदिवसीया यात्रा करिष्यते। यात्रावधौ श्रीमोदी मण्ड्या-जनपदस्य श्रीक्षेत्र-आदिचुञ्चनगिरि इत्यत्र श्रीगुरु-भैरवैक्यमन्दिरस्य उद्घाटनं करिष्यति। अस्मिन् अवसरे सः सभामेकामपि सम्बोधयिष्यति। प्रधानमन्त्री पूर्वप्रधानमन्त्रिणा एच. डी. देवेगौडा इत्यनेन सह 'सौन्दर्यलहरी शिवमहिम्नस्तोत्रम्' इत्येतयोः पुस्तकयोः संयुक्तरूपेण विमोचनं करिष्यति।

**बिहारस्य नूतनः मुख्यमन्त्रीः**

बिहारस्य उपमुख्यमन्त्री बी. जे. पीति दलस्य नेता सम्राट् चौधरी अद्य राज्यस्य नूतनमुख्यमन्त्रीरूपेण शपथं ग्रहीष्यति। राज्ये सर्वोच्चपदग्राहकत्वेन सः प्रथमः भाजपेतिदल-नेता भविष्यति। अद्य प्रातः एकादशवादने पटना-नगरस्य लोकभवने शपथग्रहण-समारोहः भविष्यति। श्रीचौधरी लोकभवने ह्यः राज्यपालं लेफ्टिनेण्ट् जनरल् (सेवानिवृत्तः) सैयद् अता हस्नैन् इत्येतं मिलित्वा सर्वकारस्य निर्माणाय आग्रहं कृतवान्। वार्ताकारैः सह वार्तालापं कुर्वन्, तारापुरस्य भाजपेति दलविधायकः सम्राट् चौधरी, बिहारस्य जनानां सेवायां, तेषां विश्वासस्य स्वप्नानाञ्च साक्षात्कारस्य अवसरोऽयमस्तीति अवधानं दत्तवान्।

सद्यः एव राज्यसभायाः निर्वाचनानन्तरं बिहारस्य मुख्यमन्त्रीपदात् जे. डी. (यू) इति दलाध्यक्षस्य नितीशकुमारस्य त्यागपत्रानन्तरम् स्थितिरेषा समुद्भूता।

**महा/राष्ट्रपतिः नागपुरम्**

राष्ट्रपतिः द्रौपदी मुर्मुः अद्यारभ्य महाराष्ट्रस्य द्विदिवसीय-यात्रायाम् भविष्यति। राष्ट्रपतिः अद्य प्रातः एम्स्-नाग्पुर् इत्यस्य द्वितीय-दीक्षान्त-समारोहे भागं ग्रहीष्यति, अनन्तरं सायङ्काले नाग्पुर्-नगरस्य राष्ट्रिय-प्रत्यक्ष-कर-अकादम्यां भारतीय-राजस्व-सेवायाः

(आय-करस्य) प्रशिक्षु-अधिकारिणाम् अष्टसप्तति- तम-समूहस्य प्रशिक्षण-समारोहे भागं ग्रहीष्यति। प्रवासस्य द्वितीये दिने राष्ट्रपतिः मुर्मू श्वः वर्धा-नगरे महात्मागान्धी-अन्ताराष्ट्रिय-हिन्दी-विश्वविद्यालयस्य षष्ठे दीक्षान्त-समारोहे भागं ग्रहीष्यति।

**पश्चिमबङ्गाल-निर्वाचनम्**

पश्चिमबङ्गालराज्य- तमिळुनाडुराज्ययोः विधानसभा-निर्वाचनाय प्रचाराभियानम् पूर्णरूपेण प्रचलति। विभिन्नदलानां प्रमुखाः नेतारः मतदातॄन् आकर्षयितुं सार्वजनिकसभाम् आयोजयन्ति, जनसभाश्च सम्बोधयन्ति। दलस्य वरिष्ठः नेता, केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य राज्ये अनेकाः जनसभाः करिष्यति, ह्यः, भाजपा-पक्षस्य वरिष्ठः नेता प्रधानमन्त्री च नरेन्द्रमोदी नमो-ऐप् माध्यमेन "मेरा बूथ सबसे मजबूत" इति संवादान्तर्गतं पश्चिमबङ्गस्य दलकार्यकर्तृभिः सह वार्तालापं कृतवान्। बी. जे. पी-पक्षस्य वरिष्ठः नेता अमितशाहः दक्षिण-दिनाजपुर-मण्डले एकस्मिन् मतदानसमारोहे भाषणं कुर्वन् प्रतिज्ञातवान् यत् यदि बी. जे. पी दलं सत्तां प्राप्स्यति तर्हि पश्चिमबङ्गप्रदेशे समान-नागरिक-संहिता प्रवर्तिता भविष्यतीति। रायगञ्ज्-माल्दा-नगरयोः निर्वाचन-सभाम् सम्बोधयन् काङ्ग्रेस्-पक्षस्य वरिष्ठः नेता राहुलगान्धी, वृत्यवसरविषयं समुत्थापितवान्। टी. एम्. सी. नेत्री पश्चिमबङ्गस्य मुख्यमन्त्री ममता बनर्जी च हावडा, पश्चिम मेदिनीपुर्, पूर्व मेदिनीपुर् इत्येतेषु मण्डलेषु जनसभाः कृतवती। पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनं द्वयोः चरणयोः भविष्यति। प्रथमस्य चरणस्य निर्वाचनं एप्रिल्-मासस्य त्योविंशे दिनाङ्के, द्वितीय-चरणस्य च निर्वाचनं एप्रिल्-मासस्य एकोनत्रिंशे दिनाङ्के भविष्यति।

**उ.प्र.नूतनं श्रमिकाणां वेतनम्**

उत्तरप्रदेश-सर्वकारेण अकुशलानां, अर्धकुशलानां, कुशलानाञ्च श्रमिकवर्गाणां मानदेयः प्रायः त्रिसहस्ररूप्यकाणि वर्धितः, परिणामतः एकविंशतिः प्रतिशतं वृद्धिः अभवत्।

**छत्तीसगढ विस्फोटः**

छत्तीसगढ-राज्यस्य शक्ति-जनपदस्थे वेदान्ता-लिमिटेड्-विद्युत्-संस्थाने बायलर् इत्यनेन सह सम्बद्धस्य वाष्प-वाहक-नलिकायाः विस्फोटनेन न्यूनातिन्यूनं त्रयोदश- कर्मकराः मृताः, एकविंशतिश्च अन्ये व्रणिताः इति आरक्षकाः ह्यः अवदन्। प्रधानमन्त्रिणा नरेन्द्रमोदिना अस्यां दुर्घटनायां मृतानां जनानां विषये शोकः प्रकटितोऽस्ति। सामाजिक-माध्यमे, श्रीमोदी, प्रत्येकस्मै मृतकस्य निकटवर्तिने प्रधानमन्त्री-राष्ट्रिय-रिलीफ् इति कोषात् द्विलक्षरूप्यकाणां, व्रणितेभ्यः पञ्चाशत्-सहस्ररूप्यकाणाञ्च अनुग्रहधनस्य घोषणाम् अकरोत्।

**क्रिकेट्-आई पी. एल्.**

आई. पी. एल्. क्रिकेट्-क्रीडायां, गतरात्रौ चेन्नै-नगरस्य एम्. ए. चिदम्बरम्-क्रीडाङ्गणे चेन्नै-सुपर्-किङ्ग्स् इति दलेन कोलकाता-नाइट-रैडर्स् इत्येतं द्वात्रिंशत् धावनाङ्कैः पराजयत।

**॥ इति वार्ताः॥**